Vidhyayana - ISSN 2454-8596
An International Multidisciplinary Peer-Reviewed E-Journal
www.vidhyayanaejournal.org
Indexed in: ROAD & Google Scholar

# सभाभ्यः सभापतिभ्यश्च

घनश्यामसिंह एन. गढवी

Vidhyayana - ISSN 2454-8596
An International Multidisciplinary Peer-Reviewed E-Journal
www.vidhyayanaejournal.org
Indexed in: ROAD & Google Scholar

अद्य आयोजितायामस्यां सभायां में विषय– 'संस्कृतपुराण' इति।

'पुराणम्' भारतस्य सर्वोच्च इतिहासः विद्यते। पुराणेभ्य– एव भारतीयजीवनस्य आदर्शः भारतस्य सभ्यता, बारतीय. संस्कृतिः एवञ्च  भारतस्य विद्यावैभवस्य उत्कृष्टवास्तविकदर्शनं प्राप्तं भवति।

पुराणेषु भारतस्य आधिभौतिकी, आदिदैविकी ह्वश्च आध्यात्मिकी स्थितिनां दर्शनं भवति। पुराणानि न तु केवलं इतिहासः अपि तु तेषु पुराणेषु आधिभौतिकादि त्रिविधा उन्नतिः अपि दर्शिता अस्ति। पुरातनकालात् एव भारतीय संस्कृतिः एवं धर्मविषयकं ज्ञानं यत्र अट्टंकितमासीत्। तादृशस्य पुराणस्य महत्त्वं आसीत्। एतस्य अपि कारणमासीत् यत् पुराणानि सनातन धर्मस्य कल्याणमार्गरूपकर्मणः, उपासनायाः एवं ज्ञानस्य उत्कृष्टरुपेण उपस्थापनं कुर्वन्ति। पुराणानि वेदानां गम्भीरविषयानां एवं समाधिगम्य विषयानां प्रकटीकरणं विभिन्न भावात्, भाषासौन्दर्यात्, अलङ्कारात्, तथा च गाथा प्रकटनात् कुर्वन्ति. वास्तविक दृष्टया पुराणानि वेदानां व्याख्याग्रन्थाः इत्यपि कथयितुं शक्यते। अतः पुराणानि सर्वथा वेदानुकुलानि एव, नात्र शंकावकाशः। एतानि पुराणानि यथा–

'मद्वयं भद्वयञ्चैव बत्रयं वचतुष्टयम्.

अनापलिङ्कुस्कानि पुराणानि प्रचक्षते।''

एतानि पुराणानि समरतानामार्थीनां सरलशब्दैः एवं कथानकशैल्या स्पष्टीकरणं कुर्वन्ति यथोक्तं महाभारतआदिपर्वणि–

'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।'

विभेति धृलश्रुताद वेदामायंप्रहरिष्यति।।

‘‘पुराणं अर्थशास्त्राणां प्रतमं ब्रह्मणा कृतम्।

अनन्तरं च वक्त्रेभ्यां वेदास्तस्य विनिर्गताः।’’

इत्यपि कुत्रचित् दृश्यते। ‘पुराणम्’ इति शब्दस्य व्युत्पत्तिः पाणिनिः, यास्कः एवं स्वयं पुराणानि प्रकटी कुर्वन्ति।

पुराणशब्दस्य अर्थ भवति– यः वृतान्तः पुरा अभवत् तस्य वर्णनं वा तस्य वृत्तान्तस्य वर्णनं यस्मिंसत् पुराणम्।

पुरा अपि नवं इति पुराणम्’

इत्यनेन स्पष्टं भवति यत्

पुरा अपि सर्वदा–सर्वकालेन नवं नवं प्रतिभाति तद् पुराणम्।

‘दिने–दिने नवं–नवं नमामि नन्दसम्भवम्’

१. तत्र भवान् यास्काचार्यः अकथयत्– ‘पुराणमाख्यानं पुराणम्’ अर्तात् यस्मिन् प्राचीनमाख्यानां मिलेत् तद् पुराणम्।

अर्थात् यस्मिन् प्राचीनमाख्यानं मिलेत् तद पुराणम्।

२. वायुपुराणे यथोक्तम्– ‘यस्मात् पुरा ह्यनतीदं पुराणं तेन तत् स्मृतम्’

अर्थात् यद् पुरा वा पूर्वकाले अपि सजीवमासीत् तद पुराणमिति।

Vidhyayana - ISSN 2454-8596
An International Multidisciplinary Peer-Reviewed E-Journal
www.vidhyayanaejournal.org
Indexed in: ROAD & Google Scholar

३. पद्मपुराणानुसारं नयामश्चेत्– 'पुरा परम्परां वष्टि पुराणं तेन तत् स्मृतम्।'

अर्थात् पुरा परम्परानुगुणं यत् तदं पुरागमन्।

४. ब्रह्माण्डपुराणे– 'पुरा एतत् अभूत्' अर्तात् प्राचीनकाले एतादृशमभवत् इति पुराणम्।

दर्शितानां व्युत्पत्तिनां मीमांसाकरणात् ज्ञायते यत् पुराणस्य वर्ण्यविषय– प्राचीनकालसम्बद्धः अस्ति।

भारतीय संस्कृत्या सम्बद्ध ज्ञानविज्ञानयोः एवञ्च कल्याणविषयकं ज्ञानार्थं पुराणानि चिरकालात् आश्रयणीयानि सन्ति।

कृष्णद्वैपायनैः भवन्तः भगवद्भिः वैदव्यासैः बहु परिश्रमात् वेदानां शाखा, प्रशाखा, ब्राह्मण, कल्पसूत्र, निरुक्त प्रक्रीयायां विभाजनं कृतम् ततापि पूर्णलोकोपकार–साफल्यं न दृष्टम् तदानीं ध्यानस्थः भूत्वा भागवतादि पुराणानां, महाभारतादि इतिहासग्रन्थानां रचना कृता। एतेन कार्येण वेदानां गूढसन्देशानां ज्ञानं सर्वेभ्य– दत्तमिति अतः एतानि पुराणानि सर्वेषां साहित्यसिकानाकृते– ह्दयानन्ददायकानि सन्ति।

**"अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।**

**परोपकारपुण्याय पापाय परपीडनम्।"**

**व्याकरणानुसारं पुराणशब्दं नयामश्चेत्–**

'पुरा नीयते इति पुराणम्' (पुरानी +५ (अ)

इकारलोपे णत्वं पुराण इति। वा

'पुरा भवमिति पुराणम्' (पुरा+वत्यु (यु) प्रत्यये 'सायं चिरं प्राहणे प्रेव्युयभ्यदष्ट युट् युलौ तद च' इति सूत्रेण ट्यु प्रत्यये यु स्थाने 'युवोरनाकौ' अनेन अनादेशो नकारस्य- 'अदकुप्वाङनुम्व्यायोयऽपि' इति अनेन सुत्रेणत्वे पुराण इति निष्पद्यते।

**पुराणस्य लक्षणम्**

'लक्षणप्रमाणाभ्यां वस्तुसिद्धिः'- नियमानुगुणं पुराणस्य किं लक्षणम्? एतादृसी जिज्ञासा स्वाभाविकी।

'ज्ञातुमिच्वा जिज्ञासा' या अस्माकं जिज्ञासा सर्वोपामस्ति सा।

एतस्य प्रश्नस्य समादानयुक्तश्लोकः प्रायः सर्वेषु पुरणेषु पाठभेदरुपेण प्रतिभाति- यथा-

''सर्गश्च प्रतिसर्गश्च वंसो मन्वन्तराणि च।

वंश्यानुचरितं चैव पुराणं पञ्चलक्षणम्।''

पुराणैः सह 'पञ्चलक्षणम्' इत्यस्य एतादृशः घनिष्ठः सम्बन्धः अस्ति कारणं एषः शब्दः अमरकोशे व्याख्या विना एव प्रयुक्तोऽस्ति. कुत्रचित् पुराणस्य मुख्यप्रतिपाद्यविषयोऽस्तिसृष्टिविद्या।

श्रीमदभागवतानुगुणं ब्रह्मवैवर्तपुराणे 'पुराणानि दशलक्षणयुक्तानि' इति उट्टङ्कितमस्ति यथा-

''सृष्टिश्चापि विसृष्टिश्च स्थितिः तेषाञ्च पालनम्।

कर्मणांवासना वार्ता मनूनां च क्रमेण च।''

Vidhyayana - ISSN 2454-8596
An International Multidisciplinary Peer-Reviewed E-Journal
www.vidhyayanaejournal.org
Indexed in: ROAD & Google Scholar

‘‘वर्णनं प्रलयानाञ्च मोक्षस्य च निरुपणम्।

तत्कीर्तनं हरेदेव वेदानां च पृथक् पृथक्।’’

‘दशाधिकं लक्षणं च महतां परीकीर्तितम्।’’

यथा भागवते महापुाणस्य लक्षणानि–

‘अत्र सर्गो विसर्गच स्थानं पोषणमूतयः।

मन्वन्तरेशानुकथा निरोधां मुक्तिराश्रयः।’’